## ।। अथ द्विपंचाशत्तमोऽध्याय: ।। Chapter-52

वसिष्ठ उवाच :-ततो गच्छेन्नृप श्रेष्ठादरिष्टामिष्टदामिह ।।
निर्बजेति समाख्याता या देवी पृथ्वीतले ।। १

अत्रायात: पुरा शंभु: श्रीमालं द्रष्टुमादरात्[1] ।।
योगसिद्धा महालक्ष्मीर्योगिन्यो यत्र भूरिश: ।। २

नग्न: कपालमासाद्य पाणिपात्रो हिभूषण: ।।
परिभ्रामच काणि योगिनीनां विलोकयन् ।। ३

असितायां चतुर्दश्यां भैक्ष्यमादाय विश्वभुक् ।।
चत्वरे समुपाविश्य भुक्तवान्भवनीपते ।। ४

ततो रात्रौ समासीनो ह्यरिष्टस्य तरोस्तले ।
भुविब्ज योगं विनिक्षिप्य सिद्धयोगासने स्थित: ।। ५

मध्यरात्रेऽथ संप्राप्ते योगिन्य: क्रीडितुं मिथ: ।।
काम[2]रूपधरा: सर्वा: सर्वालंकारभूषिता: ।। ६

-०-

१ ए द्रष्टु
२ ए कामरूपधारा: सर्वा

मातंगी ज्वालिनी चण्डा चक्रमुण्डा कपालिनी ।।
कराली कपिला यक्षी प्लवंगी भीषणी कला ।। ७

एताश्चान्याश्च योगिन्य: शक्तयस्ता: परात्मिका: ।।
भासमाना: स्वतेजोभिरायुस्तत्र चत्वरे ।। ८

यत्र देवो महेशान: सिद्धयोगासनस्थित: ।।
अत्युग्रशक्तयो राजन्नभ्युत्थानपराङ्मुखम् ।। ९

निरीक्ष्य योगिनं क्रुद्धा देवेशमिदमब्रुवन् ।। १०

योगिन्य उवाच:-अस्य चत्वरवृक्षस्य निशीथे कस्त्वमागत: ।।
इतोऽपसर शीघ्रं हि क्रीडा नोत्र भविष्यति ।। ११

वसिष्ठ उवाच :-इत्युक्त: स तदा देवो योगिनीभिरनाजैवान् ।।
न ता: किंचिदपि ब्रूते ध्यानसंसक्तमानस: ।। १२

तत: परिवृतस्ताभिरीशानो देवशक्तिभि: ।।
बध्यतां बध्यतामेष हन्यतां हन्यतामिति ।। १३

-०-

१ एन्या

ततो बद्धो महामन्त्रैः शक्तैस्तत्कालसिद्धिदैः ।।
योगिध्येयोपि देवेशस्ताभिर्मन्त्रबलान्नृप ।। १४

न तथापि विजानीते बद्धमात्मानमीश्वरः
ध्येयार्पितमनोदृष्टिरश्लिष्टस्य तरोस्तले ।। १५

नग्नः कैलाश शिखरे महोत्पाताः सुदारुणाः ।।
बभूवुः परितो राजन् प्रमथानां भयावहाः ।। १६

चकम्पे शिखरी विश्वक् ववौ वायुश्च दारुणः ।।
प्रभञ्जन्नतिवेगेन शिवाक्रीडावनद्रुमान् ।। १७

उड्डीना हंसमिथुनाः प्रद्रुत्वा मानसोर्मयः ।।
पेतुः प्रथमसौधानां ध्वजादंडाश्च समन्ततः ।। १८

ततः स्मितमुखी देवी विजयां च समीपगाम् ।।
उवाच परमा शक्तिः शिवा विस्फार्य कार्मुकम् ।। १९

देव्युवाच :- किमिदं मन्यसे शम्भु विजये विजयावहे ।।
निमील्य नयने पश्य क्वचिदीशं दिगम्बरम् ।। २०

-०-

१ ए बभुवुः

वसिष्ठ उवाच :इत्यादिष्टा तदा देव्या समीपे विजया भृशम्
दृष्ट्वाथ ध्यानदृशा देवमिदमाह सुरेश्वरीम् ।। २१

विजयोवाच :- देवि श्रीमालनाम्नास्ति क्षेत्रं लक्ष्मीविनिर्मितम् ।
तत्रारिष्टतलेऽरिष्टं प्राप्य तिष्ठति धूर्जटि: २२

चत्वरे मंडले रुद्धो योगिनीभिर्निरञ्जन: ।।
बद्धोऽस्ति पशुवन्मन्त्रैस्तत्राशु व्रज मा चिरम् ।। २३

वसिष्ठ उवाच:-इत्थं निशम्य शर्वाणी तेजोदीपितदिङ्मुखा ।।
अभ्यधावत् सुसं क्रुद्धा कैलाशशिखरान्नृप ।। २४

श्रीमालं क्षेत्रमागत्य निशीथे चत्वरे क्षणात् ।।
अरिष्टादाविरभवत् हुंकारस्वनभैरवा ।। २५

देवीतेजोविनिर्दग्धं योगिनीमण्डलं तत: ।।
पतितं तत्क्षणाभ्द्‌यो निश्चेष्टीभूय भूपते ।। २६

मन्त्रानथोपसंहृत्य देवीदेवमवोचत ।।
लब्धसंज्ञा: क्षणोनाथ योगिन्यस्तां सुरेश्वरीम् ।। २७

१ ए देवदिवंमवोचत

दृष्ट्वास्तां महास्तोत्रैः सत्त्वेर्थनार्थि[1] गता भुवि ।। २८

देव्युवाच :- माकुरुध्वमिदं भूयो दूरेऽस्मादपसर्पत ।।
अद्य प्रभृति वृंदेऽस्मिन्[2] करिष्येहं सदा स्थितिम् ।। २९

योगिन्य ऊचुः स्थातव्यमिह देवेशि हिताय जगतां त्वया ।।
चतुर्दशीदिने प्राप्ते पूजयिष्यामहे वयम् ।। ३०

वसिष्ठ उवाच:- इत्युक्त्वा प्रययुः सिद्धा योगिन्यश्चत्वरद्रुमात् ।।
ततस्तद्वृत्तमाज्ञाय शिवामित्याह शंकरः ।। ३१

देवदेव उवाच:- यस्त्वां देवि स्थितामत्र पूजयिष्यति मानवः ।।
दास्यामि सगणास्तेषां वांछितानि न संशयः ।। ३२

प्रादुर्भूतासि निम्बाकूर्वं रिष्टंहन्तुमना मम ।।
अरिष्टा नाम तेन त्वं लोके ख्याता भविष्यसि[3] ।। ३३

देव्युवाच :- ये मां सम्यक् परिज्ञाय पूजयिष्यन्ति देहिनः ।।
सदा तेभ्यः प्रसन्नाहं वरदा चंद्रशेखर ।। ३४

---

१ बी सान्त्वनार्थगता भुवि

२ बी अद्य प्रभृति लोके स्मिन्

१ ए ति

अरिष्टेति त्वया दत्तं मम नाम दिवामुखे ।।
त्रि[1]पठेद्यस्तथारात्रौ विपदस्तस्य न क्वचित् ।। ३५

वशिष्ठ उवाच:-इत्युक्त्वा सा तदा देवी स च देवो महेश्वर: ।।
कैलाशं जग्मतु: शीघ्रं विमानवरमास्थितौ ।। ३६

तत: प्रभृति सा देवी अरिष्टा नाम विश्रुता ।।
श्रीमाले वरदां पुंसां प्रादुर्भूता महेश्वरी ।। ३७

श्रोतव्यमिदमाख्यानं नरै: श्रद्धासमन्वितै:
योगिन्यो येन तुष्यन्ति शिवश्च शिवया सह ।। ३८

-०-

इति श्री अरिष्टा देवी महात्म्यं नाम द्विपंचाशत्तमोऽध्याय ।।५२

अध्याय ५०-५१ जो इस पुस्तक में है
श्री में नहीं है अत: पंचाशतमो ध्याय: श्री का ५२
- माना गया ।
१- ब त्रि